# विश्वविद्यालयस्य अधिनियमः

## विश्वविद्यालयस्य पुस्तकालयाध्यक्षः

१६-१ विश्वविद्यालयीय-ग्रन्थालयाध्यक्षस्य नियुक्तिः १८ अधिनियमस्य अनुसारं कुलपतिद्वारा भविष्यति। पुस्तकालयाध्यक्षः सवेतनः पूर्णकालिकः मुख्यश्च भविष्यति।

१६-२ विश्वविद्यालयस्य ग्रन्थालयाध्यक्ष: तादृगन्यानपि अधिकारान् निष्पादयितुं क्षमो भविष्यति । तस्मै कुलपतिपक्षात् निर्धारितानि एवञ्च प्रदत्तानि अपेक्षितानि कार्याणि करणीयत्वेन विधेयानि भविष्यन्ति।

## वित्त-लेखाधिकारिणः अधिकारः कार्यञ्च

१७.१ A वित्तलेखाधिकारिणः नियुक्तिः विश्वविद्यालयस्य कुलपतिद्वारा निर्धारित-अनुभागसंख्या – १८ अनुसारं भविष्यति।

१७.१ B वित्तलेखाधिकारी विश्वविद्यालयस्य वित्ताधिकारी मुख्यत्वेन भविष्यति। स च पूर्णकालिकः सवेतनः अधिकारी कुलपतेः साक्षात् नियन्त्रणे कार्यं करिष्यति।

१७-२ वित्त-लेखाधिकारी वित्त-लेखासमित्याः सदस्यसचिवः भविष्यति।

१७-३ वित्त-लेखाधिकारी कार्यकारिण्या परिषदा आहूत उपवेशने उपस्थितो भविष्यति तथा च तत्र स्वकीयं मन्तव्यमपि दातुमर्हो भविष्यति। तथैव रूपेणापि (तद्भिन्नरूपेणापि) स्वकीयोपस्थितिं दातुं अर्हो भविष्यति। यत्र क्वचिदपि अर्थलक्ष्यी विषयः भविष्यति। परन्तु सः मतप्रदाने अधिकृतः न भविष्यति।

१७-४ वित्त-लेखाधिकारी वित्तलेखासमित्याः संक्षिप्तं विवरणं तथा च तस्य निर्णयं कार्यान्वयनञ्च करिष्यति।

१७-५ वित्त-लेखाधिकारी वार्षिक-आर्थिकप्रायोजनस्य लेखायाः लेखापरीक्षणस्य च विवरणं वित्त-लेखाविभागस्य परिषदि तथा च कार्यकारिपरिषदि प्रस्तावस्य कृते उत्तरदायी भविष्यति।

## १७-६ वित्त-लेखाधिकारिणः कर्तव्यानि इमानि भविष्यन्ति-

१७-६-i एतदनुच्छेदासारं विश्वविद्यालयीयवित्तलेखाधिकारी सामान्य-अवधानदृष्टेः उपयोगं विश्वविद्यालयीयनिर्धारितधनस्य विषये करिष्यति तथा च वित्तसम्बन्धे विश्वविद्यालयस्य कुलपतये परामर्शं दास्यति।

१७-६-ii अयं वित्तलेखाधिकारी स्वकीयनिरीक्षण-अधिकारस्य उपयोगं विधाय निर्धारितविश्वविद्यालयस्य धनविषये अवधानदृष्टिं स्थापयन् निधिरक्षणं, निधेः निवेशनं (न्याससम्पत्तेः विश्वविद्यालयाय उपायनीकृतधनस्य सम्पत्तेश्च उत्तरोत्तर-उपचयविषये), धननिवेशस्य, संस्थाप्राप्तसम्पत्तेः प्रबन्धनञ्च करिष्यति।

१७-६-iii वित्त-लेखाधिकारी एतत् निश्चयं करिष्यति यत् विश्वविद्यालयद्वारा निर्धारितधनराशिः एकवर्षस्य कृते यद्वर्तते तन्नातिशेते समयावधिम्, तथा च सर्वाणि आवण्टितानि धनानि निर्धारित-उद्देश्यालोके सन्ति तानि सुचारुतया व्ययीक्रियन्ते इति ।

१७-६-iv वित्त-लेखाधिकारी विश्वविद्यालयस्य स्थितधनस्य स्थितिविषये मुद्रा तथा च कोषस्थस्थिरधनस्थितिविषये तथा तस्य निवेशविषये च सावधानात्मिकाम् आत्मदृष्टिपातं सततं कुर्वन् भविष्यति।

१७-६-v वित्त-लेखाधिकारी धनसङ्ग्रहोपरि अपि ध्यानं दास्यति तथा च कुलपतेः समक्षं धनसञ्चयप्रक्रियाविषये समुचितविधिसम्बद्धं विचारं प्रस्तोष्यति।

१७-६-vi वित्त-लेखाधिकारी विश्वविद्यालयीय-वित्तलेखायाः लेखा-परीक्षणं सततं कारयिष्यति।

१७-६-vii विश्वविद्यालयस्य भवन-लेखा-पञ्जिका, भूमिः संसाधनानि, यन्त्राणि च विश्वविद्यालयस्य, व्यवस्थितानि सन्ति, तथैव एतानि सर्वाणि संसाधनानि अन्यानि

च उपयोग-अर्हाणि वस्तूनि यानि कार्यालयेषु, महाविद्यालयेषु, कार्याशालासु, सङ्ग्रह-शालायां च सन्ति तानि व्यवस्थितरूपेण सन्तीति वित्त-लेखाधिकारी निरन्तरम् आश्वस्तं (कुलपतिं) करिष्यति।

१७-६-viii तथैव वित्त-लेखाधिकारी विश्वविद्यालयस्य कस्माच्चिदपि कार्यालयतः, प्रयोगशालातः, महाविद्यालयतः अथवा विश्वविद्यालयस्य कस्माच्चिदपि विभागतः विश्वविद्यालयीयसंस्थातो वा सूचनाधिगमनाय तत्-तदुपर्युक्तविभागं प्रष्टुं शक्नोति। तथा च तां सूचनां (कर्गदलिखिताम्) यदि सः तथा कर्तुमावश्यकं मनुते तस्य वित्तसम्बद्धोत्तरदायित्वं निर्वोढुं चेत्। तथा च तां सूचनां आलेखं वा सम्बद्धविभागं प्रति प्रत्यावर्तयितुं शक्नोति।

१७-६-ix तथैव वित्त-लेखाधिकारी विश्वविद्यालयस्य कुलपतिपक्षान्निष्पादनाय समर्पितकार्यैः सह अन्यान्यपि वित्तसम्बद्धानि कर्तव्यानि करिष्यति प्राप्तावसरे।

## कुलसचिव-शोधनिदेशक-पुस्तकालयाध्यक्ष-वित्त-लेखाधिकारिणां नियुक्तेर्नियमाः

१८-१ विश्वविद्यालयस्य कुलसचिव-शोधनिदेशक-पुस्तकालयाध्यक्ष-वित्त-लेखाधिकारिणां नियुक्तिः, ०२-अनुच्छेदस्य उपनियम-०२ इत्यस्यानुसारं, सङ्घटित-चयनसमित्या सम्पादितचयनप्रक्रियया च भविष्यति।

१८-२ अधिनियमस्योपविभागसंख्या (१) एकस्यानुसारम् उपर्युक्त-अधिकारिणां नियुक्तिः अधोलिखितविनियमानाश्रित्य भविष्यति यथा-

(१) कुलसचिवस्य, शोधनिदेशकस्य तथा च विश्वविद्यालयीय-ग्रन्थालयाध्यक्षस्य च नियुक्तिः विश्वविद्यालय-अनुदान-आयोग-निर्देशानुसारं साक्षात् चयनप्रक्रियामाध्यमेन भविष्यति। एवं च वित्त-लेखाधिकारिणश्च नियुक्तिः साक्षात् चयनप्रक्रियामाध्यमेन अथवा राज्यसर्वकारस्याधिकारिणः तात्कालिकप्रवृत्तप्रावधानानुसारं प्रतिनियुक्तिरूपेण भविष्यति।

(२) राज्यसर्वकारः उपर्युक्ताधिकारिणां नियुक्तिहेतवे अधोनिर्दिष्टसदस्यसम्भरितामेकां चयनसमितिं संरचयिष्यति यथा-

a. विश्वविद्यालयस्य कुलपतिः अस्याः चयनसमितेः अध्यक्षः भविष्यति ।

b. राज्यसर्वकारपक्षात् एकः अधिकारी भविष्यति ।

c. पदानुरूपं चत्वारो विषयविशेषज्ञाः विश्वविद्यालयस्य कुलपतिना मनोनीताः (नामिताः) भविष्यन्ति ।

d. कार्यकारिपरिषदः एकः सदस्यः मनोनीतः भविष्यति ।

(३) द्वितीयअनुच्छेदस्य उपनियम-C इत्यनुसारं चतुर्षु जनेषु न्यूनातिन्यूनं यदि द्वौ सदस्यौ उपस्थितौ न भवतः तावत् पर्यन्तं चयनसमितिः कस्यचित् जनस्य चयनं न करिष्यति ।

(४) चयनसमितिद्वारा चयनितः जनः राज्यसर्वकारस्य सम्पुष्टेः अनन्तरं नियुक्तः भविष्यति ।

(५) चयनाय योग्यता एवं च वेतनमानम् अनुच्छेद-०१ इत्यस्य आलोके विश्वविद्यालय-अनुदान-आयोगस्य अनुशंसानुसारं कुलसचिवस्य, पुस्तकालयाध्यक्षस्य तथा च शोधनिदेशकस्य देयं भविष्यति तथा च वित्त-लेखाधिकारिणः नियुक्तिसन्दर्भे राज्यसर्वकारस्य अनुशंसानुसारं देयं भविष्यति ।

**सङ्कायस्य सङ्कायाध्यक्षस्य च अधिकाराः कार्याणि च ।**

२५-१ सङ्कायाध्यक्षः सङ्कायविभागानां पर्यवेक्षणम् अन्यसङ्कायैः सह सहयोगभावनया च कार्यं करिष्यति । (स च पुनः सङ्गोष्ठ्याः, पाठ्यक्रमाणां, कार्यक्रमाणां सङ्कायगतसंस्तुतविषयाणां सन्दर्भे आयोजनं विधास्यति। स सङ्कायगतविभागानां सम्बद्ध-महाविद्यालयानां मान्यताप्राप्तसंस्थानां अनुमोदनप्राप्तसंस्थानां च अध्यापनीयपाठ्यक्रमसन्दर्भे निरीक्षणं मार्गनिर्देशनञ्च करिष्यति तथा च तत्सन्दर्भे यदि सङ्कायाध्यक्षः समुचितं मनुते तदा कुलपतेः समक्षं प्रतिवेदनमपि प्रस्तोतुम् अर्हति। स संकायसम्बद्धविनियमानां, अनुपालनस्योत्तरदायित्वनिर्वहणमपि करिष्यति।)

२५-२ विना पक्षपातं सामान्य-अग्रिमपरिस्थित्यनुसारं सङ्कायविनियमनिर्धारणं यदि आवश्यकं भवति तदा अधिनियमानुसारं विश्वविद्यालयस्य अधोलिखितानां विषयाणां विषये सङ्कायस्तद्विचारयिष्यति; तत् विनियमप्रस्तावं क्रमश: शैक्षणिक-परिषदं कार्यकारिपरिषदं च प्रति तत्सन्दर्भे नियमान् निर्मातुम् अनुमतिं प्रदातुं च शैक्षणिकपरिषदं कार्यकारिपर्षदञ्च प्रति सङ्कायः प्रेषयिष्यति।

(i) सङ्काये पाठ्यक्रम-निर्धारयितुम् प्रस्तावः।

(ii) सङ्काये विशेषाध्ययनसम्बद्धः पाठ्यक्रमनिर्धारणाय प्रस्तावः।

(iii) विद्याशाखागतसम्बद्धपरीक्षासु उत्तीर्णतायाः नियमनिर्धारणाय तथा च तत्परीक्षासु श्रेणिप्रदानाय प्रस्तावः।

(iv) सङ्कायेन निर्धारितविषयेषु शोधकार्यम् उन्नेतुं प्रस्तावः।

(v) सङ्कायं प्रति विषय-अध्यापनविषये निर्धारणम्।

(vi) सङ्कायेन सह सम्बद्ध-विभागस्य, शोधसंस्थाया: तथा च विशेषाध्यायनविषयकप्रस्तावः, सङ्काय-ग्रन्थालयस्य, प्रयोगशालाया:, सङ्ग्रहालयस्य संस्थापनाविषयकप्रस्ताव-प्रेषणाय अधिकृतः भविष्यति।

(vii) सङ्काये प्रोफेसर, एसोसियेट प्रोफेसर एवञ्च असिस्टेन्ट प्रोफेसर पदैः सहान्येषां प्राध्यापकानां व्यवस्था तेषां कृते कर्तव्यनिर्धारणादिसम्बद्धः प्रस्तावः शैक्षणिकपरिषदं कार्य-कारिपरिषदञ्च प्रति अनुमोदनार्थं सङ्कायः प्रस्तावं प्रेषयिष्यति।

(viii) तथैव सङ्कायः शिक्षावृत्तेः, शिक्षा-यात्रा-वृत्तेः, विद्वन्मानदेयस्य, छात्रवृत्तेः पदकानाम्, पुरस्काराणां तथा अन्येषां सम्मानानां कृते अपि विनियम-निर्माणाय समितिनिर्माणार्थं शैक्षणिकपरिषदि, कार्यकारि-परिषदि च प्रस्तावं प्रस्तोतुं शक्नोति।

(ix) सङ्कायः प्राध्यापकानां कार्यभारविषये प्रत्येकं विषयसन्दर्भे, प्रयोगशाला-कार्यभारविषये तथैव अन्यनिर्धारितकार्यभारसम्बन्धे छात्राणां कृते न्यूनाधिककार्यभारनियमान् निर्धार्य तेषां संस्तुत्यर्थं शैक्षणिक-कार्यकारिपरिषदि प्रस्तावं प्रस्तोष्यति।

(x) तथैव सङ्कायः परीक्षाणां समतुलता-निर्धारणविषयेऽपि (स्वकीयविश्वविद्यालयस्य अन्यशिक्षणसंस्थानपरीक्षाणाञ्च) विचार्य प्रस्तावं तयोः परिषदोः संस्तुत्यवाप्त्यर्थं प्रस्तोष्यति।

(xi) विश्वविद्यालयद्वारा संस्तुतविषयाणां सन्दर्भे शिथिलीकरणप्रक्रिया अथवा सम्बद्धमहाविद्यालयेषु उपाधेः प्राप्त्यर्थं शिथिलीकरणप्रक्रियाविषये तथा च प्रमाणपत्रपदविकाविषये च प्रस्तावं करिष्यति सङ्कायः।

(xii) विश्वविद्यालयस्य उद्देश्यपूर्तये अन्यप्रस्तावस्य प्रक्रिया-संसूचनम्।

## २७- (१) विश्वविद्यालयः वित्त-लेखयोः समितिं रचयिष्यति।

(२) वित्तलेखासमितेः संरचना, समितेः सदस्यानां कालावधिनिर्धारणं तथा च तत्सम्बन्धिन्याः प्रक्रियायाः अनुसरणम् इत्यादिनियमाः समितिद्वारा निर्धारयितुं शक्यन्ते ।

(३) वित्त-लेखासमितिः निम्नलिखितानि कार्याणि निष्पादयिष्यति ।

(A) विश्वविद्यालयद्वारा अवाप्तव्ययस्य विश्लेषणं विधास्यति ।

(B) विश्वविद्यालयद्वारा निर्धारितव्यययोजनाधनराशेः उपयोगस्य प्रावधानानुसारं निश्चयीकरणं करिष्यति ।

(C) विश्वविद्यालस्य आर्थिक-स्रोतसां स्थितेः आकलनं समीक्षणं च वित्त-लेखासमितिः करिष्यति ।

(D) अग्रिमव्यययोजनाधनराशेः प्रायोजनां विधास्यति ।

(E) प्रशासनिकव्ययस्य कृते धनराशेः संस्तुतिः ।

(F) कार्यकारिपरिषदा विश्वविद्यालयस्य आदिष्टकार्येषु अन्य-वित्त-लेखा-सम्बन्धिकार्यं यथा आय-व्ययस्य च परीक्षणं समितिः विधास्यति ।

(G) कार्यकारिपरिषदा याचनाकाले समितिः इयं कार्यकारिपरिषदे वित्तविषये स्वकीयं विचारम् अपि दातुम् अर्हति ।

## विशवविद्यालयस्य सम्बन्धसंस्थाभ्यः सम्बद्धतायाः मान्यतायाश्च प्रत्याहरणम्

५५- (१) विश्वविद्यालयेन अस्य सम्बद्धमहाविद्यालयेभ्यः अथवा मान्यताप्राप्तसंस्थाभ्यः अधिनियमस्य भागसंख्या-५० (पंचाशत्) इत्यनुसारं विनियमस्य अथवा ५१ नियमसंख्यान्तर्गतप्रावधानस्य कस्यापि प्रतिबन्धस्य अननुपालनावस्थायां यत् शिक्षाव्यवस्थायाः हितं प्रति पक्षपातपूर्णं भवति चेत् विश्वविद्यालयः प्रदत्तसम्बद्धतां मान्यतां वा निरस्तीकर्तुं, परिवर्तनं तत्र विधातुं, अस्थायिरूपेण निरोद्धुं वा प्रभविष्यति ।

(२) अधिनियमोपविभागसंख्या-(१) इत्यन्तर्गतं सम्बद्धतायाः, मान्यतायाः निरस्तीकरणस्य, परिवर्तनस्य, अस्थायिरूपेण निरोधस्य वा प्रवर्तना निर्णयश्च कार्यकारिपरिषदा करिष्यते । सम्बद्धतायाः मान्यतायाः वा निरस्तीकरणं, परिवर्तनं, अस्थायिनिरोधो वा तया प्रक्रियया भवेत् यस्य नियमस्वरूपे निर्धारणं भवितुमर्हेत् ।

(३) विश्वविद्यालयेन प्रदत्तसम्बद्धतायाः मान्यतायाः वा यत् किमपि भवेत् तद्विषये निरस्तीकरणात् पूर्वं सम्बद्धमहाविद्यालयस्य प्राचार्यस्य अथवा संस्थायाः प्रधानस्य तद्विषये पक्षमपि श्रोतुं तद्विध्यनुसारं प्रक्रियानुसारं च अवसरः तस्मै प्रदातव्यः यद्विनियमरूपेण निर्धारितं भवेत् ।

(४) यदा विश्वविद्यालयः स्वसम्बद्धमहाविद्यालयेभ्यः, मान्यताप्राप्तसंस्थानेभ्यः प्रदत्तः सम्बद्धताऽधिकारः मान्यताधिकारः वा यः कोऽपि स्यात्, निरस्तीकर्तुं पूर्णरूपेण प्रत्याहरणम् आंशिकरूपेण किमपि परिवर्तनं परिवर्धनं वा कर्तुमुत्सहते आदेशपत्रमाध्यमेन स्यात् । तस्मिन् आदेशपत्रे तथा करणस्याधारः स्पष्टतया उल्लिखितः भवेत् ।

# सम्बद्धतानिरस्तीकरणम्

५६-(१) विश्वविद्यालयस्य कार्यकारिपरिषद् कस्यैचित् संस्थायै विश्विद्यालयेन प्रदत्तां सम्बद्धतां मान्यतां वा निरस्तां कर्तुं प्रभविष्यति । एतत् तदा भवेत् यदि प्रभाविता संस्था प्रदत्तसम्बद्धतासम्बन्धे मान्यतासम्बन्धे वा प्रतिबन्धनस्य उल्लङ्घनं करोति, अथवा विश्वविद्यालयेन अपेक्षितं निर्धारितं विश्वविद्यालयीयं कार्यं न करोति येन शिक्षाहितमुपेक्ष्यते अथवा विश्वविद्यालयेन मान्यताप्राप्तः कश्चित् शिक्षकः तत् संस्थानं त्यजति ।

(२) उपनियम-(१) इत्यत्र लिखिते प्रसङ्गे सम्बद्धस्य मान्यताप्राप्तस्य वा संस्थानस्य कृते कार्यकारिपरिषद् लिखितरूपेण सम्बद्धसंस्थायाः प्राचार्यपक्षतः स्वपक्षोपस्थापनाय अवसरं प्रदास्यति । एषः अवसरः सम्बद्धतानिरसनादेशस्य निर्गमनात् प्राक् कल्पनीयः ।

(३) कार्यकारिपरिषद् निर्धारितप्रक्रियाम् आश्रयन्ती निर्णेष्यति - यत् किं सम्बद्धता, मान्यता वा संस्थायाः निरस्तीकरणीयाऽस्ति, परिवर्तनीयाऽस्ति, अस्थायीरूपेण निरोद्धव्याऽस्तीति यत्किमपि स्यात्, ततश्चादेशपत्रे निर्गतं करिष्यति ।

# ५७-अधिनियमः-

कार्यपरिषद् सर्वेषां कृते सामान्यरूपेण अथवा अधस्तनेषु अन्यतमस्य विषये अधिनियमं विनियमान् निर्मातुं प्रभविष्यति ।

१- मानद-उपाधेः प्रावधानविषये ।

२- उपाधिप्रदानाय दीक्षान्तसमारोहायोजनविषये ।

३- विश्वविद्यालयीयाधिकारिणां विषयेऽधिकार-कर्तव्य-प्रावधानस्य विषये ।

४- विश्वविद्यालयस्य संविधानम् अधिकारकर्तव्ये प्रशासनिकवर्गस्य च अस्य समितेः प्रावधानानुसारं संरक्ष्यते ।

५- विश्वविद्यालयीयविभागानां, संस्थानां शोधस्य विशिष्टाध्ययनस्य वा, सम्बद्धमहाविद्यालयेषु स्नातकोत्तर-केन्द्रस्य छात्रावासस्य च परिरक्षणसन्दर्भे नियमान् निर्मातुं परिषदियं शक्नोति ।

६- तथैव रिक्तदानस्य, सामान्यदानस्य, दायभागस्य च स्वीकरणसम्बद्धान् तत्प्रबन्धनसम्बद्धान् च विनियमान् निर्मातुं प्रभविष्यति ।

७- स्नातकानां पञ्जीकरणसम्बद्धान् तथैव पञ्जीकृतानां स्नातकानां पञ्जिकायाः परिरक्षणसम्बद्धान् नियमान् निर्मातुं प्रभविष्यति ।

८- अधिकृतपरिषदां विश्वविद्यालयस्य, उपवेशनप्रक्रियासम्बद्धान् तथा च तासां कार्यनिष्पादनसम्बद्धान् विनियमान् अपि निर्मातुं प्रभविष्यति ।

९- विश्वविद्यालयेन सह सम्बद्धमहाविद्यालयेषु मान्यताप्राप्तमहाविद्यालयेषु अनुमोदितसंस्थानेषु च आचार्य-उपाचार्य-सहायकाचार्य-शिक्षकाणाञ्च सन्दर्भेऽर्हतानिर्धारणनियमान् निर्मातुं प्रभविष्यति ।

१०- महाविद्यालयेऽधिकतमसंख्यायाः प्रवेशार्थं नियमान् अपि निर्मातुं शक्नोति ।

११- विश्वविद्यालयस्य कृते पर्याप्त-भौतिक-सौविध्याय यथा भवनानां प्रयोगशालानां, ग्रन्थालयस्य, पुस्तकानां, अध्यापनाय अपेक्षित-उपस्कराणां,

शोधकार्याय तथा च छात्रावासाय अपेक्षितसौविध्याय विनियमान् निर्मातुं प्रभविष्यति ।

१२- तान् सर्वान् नियमान् येऽस्याधिनियमालोके आयान्ति अथवा आगन्तुं शक्नुवन्ति तान् निर्मातुं प्रभविष्यति ।

१३- इयं समितिः तद्व्यवस्थाविषयेऽपि पूर्वोक्तरीत्या नियमान् निर्मातुं प्रभविष्यति, ये छात्राणां स्नातककक्षीयपाठ्यक्रमे, उपाधिपाठ्यक्रमे तथा चान्यविशिष्टशैक्षणिक-पाठ्यक्रमे प्रवेशेन सम्बद्धाः स्युः ।

१४- परीक्षकाणां नियुक्तिविषये प्रशासनिकप्रतिबद्धतासम्बद्धान् नियमान् निर्मातुं प्रभविष्यति ।

१५- परीक्षायाः आयोजनसम्बद्धान् नियमान् निर्मातुम् इयं परिषद् प्रभविष्यति ।

१६- विश्वविद्यालयीयशिक्षकाणां मान्यताप्रदानसम्बद्धनियमान् निर्मातुं प्रभविष्यति ।

१७- विश्वविद्यालयीयच्छात्राणाम् आवासव्यवस्थायाः प्रतिबद्धता अनुशासनस्य च विषये विनियमान् निर्मातुं प्रभविष्यति ।

१८- छात्रावासस्य मान्यताप्रदानसम्बद्धान् नियमान् निर्मातुं प्रभविष्यति ।

१९- तथैव मान्यताप्राप्तमहाविद्यालयानां, सम्बद्धसंस्थानाम्, अनुमोदितसंस्थानाञ्च निरीक्षणविषये नियमान् निर्मातुं प्रभविष्यति ।

२०- विश्वविद्यालयेन मान्यताप्राप्तमहाविद्यालयैः सम्बद्धसंस्थानैः अनुमोदितसंस्थानैश्च छात्रस्थानान्तरणनियमोपयोगविषये, नियमपर्यवेक्षणविषये च नियमान् निर्मातुं प्रभविष्यति ।

२१- संविदायाः सहसम्मतेः वा विश्वविद्यालयपक्षतः प्रयोगस्य प्रक्रियानियमान् निर्मातुं प्रभविष्यति ।

२२- सामान्यतया सर्वे ते विषयाः येषां कृते कार्यकारिपरिषदः विचारे परिषदे प्रदत्ताधिकार-कर्तव्ययोः प्रयोगः आवश्यकोऽस्ति तत्सम्बद्धान् अपि नियमान् निर्मातुं प्रभविष्यति ।